# Chitraguptaproktam Bilvamulasthite Shivalingapujamahimakathanam

# ચિત્રગુપ્તપ્રોક્તં બિલ્વમૂલસ્થિતે શિવલિઙ્ગપૂજામહિમકથનમ્

## Document Information

Text title : Chitraguptaproktam Bilvamulasthite Shivalingapujamahimakathanam

File name : bilvamUlasthiteshivalingapUjAmahimakathanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 46 | 77-84 ||

Latest update : February 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# Chitraguptaproktam Bilvamulasthite Shivalingapujamahimakathanam

# ચિત્રગુપ્તપ્રોક્તં બિલ્વમૂલસ્થિતે શિવલિઙ્ગપૂજામહિમકથનમ્

ચિત્રગુપ્તઃ -
યો બિલ્વમૂલસ્થિતલિઙ્ગપૂજાં કરોતિ ભક્ત્યા નવબિલ્વપત્રૈઃ ।
તત્પુણ્યરાશિર્ગણનામતીતઃ સ એવ કૈલાસપતિપ્રિયોઽપિ ॥ ૭૭॥

બિલ્વમૂલસ્થિતે લિઙ્ગે શિવઃ સન્નિહિતઃ સ્વયમ્ ।
બિલ્વપત્રાણિ ગૃહ્ણાતિ શિવભક્તાર્પિતાનિ સઃ ॥ ૭૮॥

ન રત્નાનિ ગૃહ્ણાતિ ગૌરીસહાયો યથા બિલ્વપત્રાણિ ગૃહ્ણાતિ મૂર્ધ્ના ।
સ્વભક્તાર્પિતાનિ પ્રિયાણીતિ મત્વા દદાત્યેવ મુક્તિં સ તૈરર્ચિતોઽપિ ॥ ૭૯॥

કિમન્યન્મહાદેવલિઙ્ગાર્પિતેન પરિચ્છિન્નબિલ્વીદલેનાપિ તુલ્યઃ ।
તદેકં મહાપાતકાપારશૈલપ્રદાહાય શક્તં મહાપાવકાભમ્ ॥ ૮૦॥

કિમન્યન્મહેશાય દેયં પ્રિયં વા ન બિલ્વીદલાન્યત્ પ્રિયં ભૂતલેઽસ્મિન્ ।
પુરા બિલ્વપત્રૈઃ સમારાધ્ય ધીરાઃ સુરત્વં ચ લબ્ધ્વા શિવં તે પ્રપન્નાઃ ॥ ૮૧॥

અહો બિલ્વમૂલસ્થલિઙ્ગાર્ચનેન પ્રયાન્ત્યેવ સર્વેઽપિ શર્વં મહાર્હમ્ ।
પદં પ્રાપ્ય તુષ્ટા ભવન્ત્યેવ સત્યં ન તૈરસ્તિ તુલ્યોઽત્ર લોકે પરત્ર ॥ ૮૨॥

યઃ કલ્મલીકતમનુત્તમબિલ્વમૂલે બિલ્વીદલેન કમલૈરમલૈશ્ચ ભક્ત્યા ।
સમ્પૂજયત્યસકૃદાદરતો વિલોક્ય તં પૂજયન્તિ બહુધા ત્રિદશા મુનીન્દ્રાઃ ॥ ૮૩॥

ન બિલ્વપત્રાર્પણપુણ્યતુલ્યં પુણ્યં ન વેદેષુ યતસ્તદેવ ।
સર્વાર્થસિદ્ધિર્ભવતીતિ મન્યે ધન્યે ધન્યેન માન્યેન શિવાર્ચનેન ॥ ૮૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ચિત્રગુપ્તપ્રોક્તં બિલ્વમૂલસ્થિતે શિવલિઙ્ગપૂજામહિમકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૪૬। ૭૭-૮૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 46. 77-84 ..

Proofread by Ruma Dewan

*Chitraguptaproktam Bilvamulasthite Shivalingapujamahimakathanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*